श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

।। श्रीहरिः ।।

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।
देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्।।

नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनः(स्), तं(न्) नमामि हरिं(म्) परम्।।

## श्रीमद्भागवतमहापुराणम् दशमःस्कंधः
## अथैकत्रिंशोध्यायः(गोपिका गीत)



प्रेम का रस बिछोह की पाती
गोपी गीत अमृत की भांति।।

गोप्य ऊचुः

जयति तेऽधिकं(ञ्) जन्मना व्रजः(श्),
श्रयत इन्दिरा शश्वदत्र हि।
दयित दृश्यतां(न्) दिक्षु तावकास्-
त्वयि धृतासवस्त्वां(म्) विचिन्वते।।1।।

धृता + सवस् + त्वां(म्)

शरदुदाशये साधुजातसत्
सरसिजोदरश्रीमुषा दृशा।
सुरतनाथ तेऽशुल्कदासिका,
वरद निघ्नतो नेह किं(म्) वधः।।2।।

सरसि + जोदर + श्रीमुषा

विषजलाप्ययाद् व्यालराक्षसाद्
वर्षमारुताद् वैद्युतानलात्।
वृषमयात्मजाद् विश्वतोभया-
दृषभ ते वयं(म्) रक्षिता मुहुः।।3।।

विष + जलाप्ययाद्, व्याल + राक्षसाद्
वर्ष + मारुताद्, वैद्युता + नलात्
वृष + मयात्मजाद्

न खलु गोपिकानन्दनो भवा–
नखिलदेहिनामन्तरात्मदृक्।
विखनसार्थितो विश्वगुप्तये
सख उदेयिवान् सात्वतां(ङ्) कुले।।4।।

नखिल + देहिना + मन्त + रात्मदृक्
विखन + सार्थितो

विरचिताभयं(म्) वृष्णिधुर्य ते
चरणमीयुषां(म्) सं(व्)सृतेर्भयात्।
करसरोरुहं(ङ्) कान्त कामदं (म्)
शिरसि धेहि नः(श्) श्रीकरग्रहम्।।5।।

विरचिता + भयं
सं(व्)सृतेर् + भयात्

व्रजजनार्तिहन् वीर योषितां(न्)
निजजनस्मयध्वं(व्)सनस्मित।
भज सखे भवत्किं(ङ्)करीः(स्) स्म नो
जलरुहाननं(ञ्) चारु दर्शय।।6।।

व्रज + जनार् + तिहन्
निज + जनस्मय + ध्वं(व्)सनस्मित

प्रणतदेहिनां(म्) पापकर्शनं(न्)
तृणचरानुगं(म्) श्रीनिकेतनम्।
फणिफणार्पितं(न्) ते पदाम्बुजं(ङ्)
कृणु कुचेषु नः(ख्) कृन्धि हृच्छयम्।।7।।

प्रणत + देहिनां(म्)
तृण + चरानुगं(म्)
फणि + फणार्पितं(न्)

मधुरया गिरा वल्गुवाक्यया
बुधमनोज्ञया पुष्करेक्षण।
विधिकरीरिमा वीर मुह्यती–
रधरसीधुनाऽऽप्याययस्व नः।।8।।

वल्गु + वाक्यया
बुध + मनोज्ञया
विधि + करी + रिमा
रधर + सीधुनाऽऽ + प्याययस्व

तव कथामृतं(न्) तप्तजीवनं(ङ्)
कविभिरीडितं(ङ्) कल्मषापहम्।
श्रवणमङ्गलं(म्) श्रीमदाततं(म्)
भुवि गृणन्ति ते भूरिदा जनाः।।9।।

तप्त + जीवनं(ङ्)
कवि + भिरीडितं(ङ्)

प्रहसितं(म्) प्रिय प्रेमवीक्षणं(म्)
विहरणं(ञ्) च ते ध्यानमङ्गलम्।
रहसि सं(व्)विदो या हृदिस्पृशः(ख्)
कुहक नो मनः(ह्) क्षोभयन्ति हि।।10।।

प्रेम + वीक्षणं(म्)

चलसि यद् व्रजाच्चारयन् पशून्
नलिनसुन्दरं(न्) नाथ ते पदम्।
शिलतृणां(ङ्)कुरैः(स्) सीदतीति नः(ख्)
कलिलतां(म्) मनः(ख्) कान्त गच्छति।।11।।

व्रजाच् + चारयन्
शिल + तृणां(ङ्) + कुरैः(स्)

दिनपरिक्षये नीलकुन्तलैर्-
वनरुहाननं(म्) बिभ्रदावृतम्।
घनरजस्वलं(न्) दर्शयन् मुहुर्-
मनसि नः(स्) स्मरं(म्) वीर यच्छसि।।12।।

दिन + परिक्षये
घन + रजस् + वलं(न्)

प्रणतकामदं(म्) पद्मजार्चितं(न्)
धरणिमण्डनं(न्) ध्येयमापदि।
चरणपं(ङ्)कजं(म्) शन्तमं(ञ्) च ते
रमण नः(स्) स्तनेष्वर्पयाधिहन्।।13।।

पद्म + जार्चितं(न्)
स्तनेष् + वर्प + याधिहन्

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

सुरतवर्धनं(म्) शोकनाशनं(म्)
स्वरितवेणुना सुष्ठु चुम्बितम्।
इतररागविस्मारणं(न्) नृणां(म्)
वितर वीर नस्तेऽधरामृतम्।।14।।

सुरत + वर्धनं(म्)
स्वरित + वेणुना
इतर + रागविस् + मारणं(न्)
नस् + तेऽधरा + मृतम्

अटति यद् भवानह्नि काननं(न्)
त्रुटिर्युगायते त्वामपश्यताम्।
कुटिलकुन्तलं(म्) श्रीमुखं(ञ्) च ते
जड उदीक्षतां(म्) पक्ष्मकृद् दृशाम्।।15।।

त्रुटिर् + युगायते
त्वाम + पश्यताम्

पतिसुतान्वयभ्रातृबान्धवा-
नतिविलङ्घ्य तेऽन्त्यच्युतागताः।
गतिविदस्तवोद्गीतमोहिताः(ख्)
कितव योषितः(ख्) कस्त्यजेन्निशि।।16।।

पतिसुतान्वय + भ्रातृबान्धवा
तेऽन् + त्यच् + युतागताः
गति + विदस्तवोद् + गीतमोहिताः(ख्)
कस्त्य + जेन् + निशि

रहसि सं(व्)विदं(म्) हृच्छयोदयं(म्)
प्रहसिताननं(म्) प्रेमवीक्षणम्।
बृहदुरः(श्) श्रियो वीक्ष्य धाम ते
मुहुरतिस्पृहा मुह्यते मनः।।17।।

हृच्छ + योदयं(म्)
मुहुरति + स्पृहा

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

व्रजवनौकसां(म्) व्यक्तिरङ्ग ते
वृजिनहन्त्र्यलं(म्) विश्वमङ्गलम्।
त्यज मनाक् च नस्त्वत्स्पृहात्मनां(म्)
स्वजनहृद्रुजां(म्) यन्निषूदनम्।।18।।

व्रज + वनौ + कसां(म्)
वृजि + नहन् + त्र्यलं(म्)
नस् + त्वत् + स्पृहात् + मनां(म्)
यन् + निषूदनम्

यत्ते सुजातचरणाम्बुरुहं(म्) स्तनेषु
भीताः(श्) शनैः(फ्) प्रिय दधीमहि कर्कशेषु।
तेनाटवीमटसि तद् व्यथते न किं(व्)स्वित्
कूर्पादिभिर्भ्रमति धीर्भवदायुषां(न्) नः।।19।।

सुजात + चरणाम् + बुरुहं(म्)
तेना + टवी + मटसि
कूर्पादि + भिर् + भ्रमति
धीर् + भवदा + युषां(न्)

इति श्रीमद्भागवते महापुराणे पारमहं(व्)स्यां(म्) सं(व्)हितायां(न्)
दशमस्कन्धे पूर्वार्धे रासक्रीडायां(ङ्) गोपीगीतं(न्) नामैकत्रिं(व्)शोऽध्यायः।।



ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।